# 99 - एकोनशततम दशकम्
# वेद स्तुतिः

विष्णोर् वीर्याणि को वा कथयतु धरणेः कश्च रेणून् मिमीते
यस्यै वाङ्घ्रि त्रयेण त्रिजग दभिमितं मोदते पूर्ण सम्पत्
योसौ विश्वानि धत्ते प्रियमिह परमं धाम तस्याभियायां
तत् भक्ता यत्र माद्यन्ति अमृत रस मरन्दस्य यत्र प्रवाहः ॥ ॥99-1॥

आद्यायाशेष कर्त्रे प्रति निमिष नवीनाय भर्त्रे विभूतेः
भक्तात्मा विष्णवे यः प्रदिशति हवि रादीनि यज्ञार्चनादौ ।
कृष्णाद्यं जन्म यो वा महदिह महतो वर्णयेत्सोऽयमेव
प्रीतः पूर्णो यशोभिः त्वरित मभिसरेत् प्राप्य मन्ते पदं ते ॥99-2॥

हे स्तोतारः कवीन्द्राः तमिह खलु यथा चेत यध्वे तथैव
व्यक्तं वेदस्य सारं प्रणुवत जननोपात्त लीला कथाभिः ।
जानन्तश्चास्य नामानि अखिल सुख कराणीति सङ्कीर्तयध्वं
हे विष्णो कीर्तनाद्यैः तव खलु महतः तत्त्व बोधं भजेयम् ॥ ॥99-3॥

विष्णोः कर्माणि सम्पश्यत मनसि सदा यैस् स धर्मा न बध्नाद्
या नीन्द्रस्यैष भृत्यः प्रिय सख इव च व्यातनोत् क्षेमकारी ।
वीक्षन्ते योग सिद्धाः परपद मनिशं यस्य सम्यक् प्रकाशं
विप्रेन्द्रा जाग रूकाः कृत बहु नुतयः यच्च निर्भासयन्ते ॥ ॥99-4॥

नो जातो जायमानोऽपि च समधिगतः त्वन् महिम्नोऽवसानं
देव श्रेयांसि विद्वान् प्रति मुहुरपि ते नाम शंसामि विष्णो ।
तं त्वां संस्तौमि नानाविध नुति वचनैः अस्य लोकत्रयस्यापि
ऊर्ध्वं विभ्राजमाने विरचित वसतिं तत्र वैकुण्ठ लोके ॥ ॥99-5॥

आपस् सृष्ट्यादि जन्याः प्रथम मयि विभो गर्भदेशे दधुस्त्वां
यत्र त्वय्येव जीवाः जल शयन हरे सङ्गता ऐक्य मापन् ।
तस्याजस्य प्रभो ते विनिहित मभवत् पद्म मेकं हि नाभौ
दिक्पत्रं यत्किलाहुः कनक धरणि भृत् कर्णिकं लोक रूपम् ॥ ॥99-6॥

हे लोका विष्णु रेतत् भुवन मजनयत् तन्न जानीथ यूयं
युष्माकं ह्यन्तरस्थं किमपि तदपरं विद्यते विष्णु रूपम् ।
नीहार प्रख्य माया परिवृत मनसो मोहिता नाम रूपैः
प्राण प्रीत्यैक तृप्ताः चरथ मख पराः हन्त नेच्छा मुकुन्दे ॥ ॥99-7॥

मूर्ध्ना मक्ष्णां पदानां वहसि खलु सहस्राणि सम्पूर्य विश्वं
तत् प्रोत्क्रम्यापि तिष्ठन् परिमित विवरे भासि चित्तान्तरेऽपि ।
भूतं भव्यं च सर्वं परपुरुष भवान् किञ्च देहेन्द्रियादिषु
आविष्टोऽप्युद्गतत्वात् अमृत सुख रसं चानु भुङ्क्षे त्वमेव ॥ ॥99-8॥

यत्तु त्रैलोक्य रूपं दधत् अपि च ततो निर्गतोऽ नन्त शुद्ध-
ज्ञानात्मा वर्तसे त्वं तव खलु महिमा सोऽपि तावान् किमन्यत् ।
स्तोकस्ते भाग एव अखिल भुवन तया दृश्यते त्र्यंश कल्पं
भूयिष्ठं सान्द्र मोदात्मकं उपरि ततो भाति तस्मै नमस्ते ॥ ॥99-9॥

अव्यक्तं ते स्वरूपं दुरधिगम तमं तत्तु शुद्धैक सत्त्वं
व्यक्तं चाप्येत देव स्फुटम् अमृत रसाम्भोधि कल्लोल तुल्यम् ।
सर्वोत्कृष्टा मभीष्टां तदिह गुणरसे नैव चित्तं हरन्तीं
मूर्तिं ते संश्रयेऽहं पवन पुरपते पाहि मां कृष्ण रोगात् ॥ ॥99-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥